चौखम्बा स्तोत्र ग्रन्थमाला

७

॥ श्रीसीतासहस्रनामस्तोत्रम् ॥

(नामावलीसहितम्)

चौखम्बा संस्कृत प्रतिष्ठान : दिल्ली

मूल्य १०.००

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ श्रीरस्तु ॥

॥ श्रीसीतासहस्रनामस्तोत्रम् ॥

(नामावलीसहितम्)



चौखम्बा संस्कृत प्रतिष्ठान

३८ यू. ए., बंगलो रोड, जवाहरनगर

दिल्ली ११०००७

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ श्रीरस्तु ॥

॥ श्रीसीतासहस्रनामस्तोत्रम् ॥



ब्रह्मणो वचनं श्रुत्वा रामः कमललोचनः ।
प्रोन्मील्य शनकैरक्षि वेपमानो महाभुजः ॥ १
प्रणम्य शिरसा भूमौ तेजसा चापि विह्वलः ।
भीतः कृतांजलिपुटः प्रोवाच परमेश्वरीम् ॥ २
का त्वं देवि विशालाक्षि शशांकावयवांकिते ।
न जाने त्वां महादेवि यथावद्ब्रूहि पृच्छते ॥ ३

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रामस्य वचनं श्रुत्वा ततः सा परमेश्वरी ।
व्याजहार रघुश्रेष्ठं योगिनामभयप्रदा ॥ ४
मां विद्धि परमां शक्तिं महेश्वरसमाश्रयां ।
अनन्यामव्ययामेकां यां पश्यन्ति मुमुक्षवः ॥ ५
अहं वै सर्वभावानामात्मा सर्वान्तराशिवा ।
शाश्वती सर्वविज्ञाना सर्वमूर्तिप्रवर्तिका ॥ ६
अनन्ताऽनन्तमहिमा संसारार्णवतारिणी ।
दिव्यं ददामि ते चक्षुः पश्य मे पदमैश्वरम् ॥ ७

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इत्युक्त्वा विररामैषा रामोपश्यच्च तत्पदं ।
कोटिसूर्यप्रतीकाशं विश्वक्तेजो निराकुलम् ॥ ८
ज्वालावलिसहस्राढ्यं कालानलशतोपमं ।
दंष्ट्राकराळदुर्धर्षं जटामण्डलमण्डितम् ॥ ९
त्रिशूलवरहस्तं च घोररूपं भयावहम् ।
प्रशाम्यत्सौम्यवदनमनंतैश्वर्यसंयुतम् ॥ १०
चन्द्रावयवलक्ष्माढ्यं चन्द्रकोटिसमप्रभं ।
किरीटिनं गदाहस्तं नूपुरैरुपशोभितम् ॥ ११
दिव्यमालाम्बरधरं दिव्यगन्धानुलेपनं ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शङ्खचक्रकरं काम्यं त्रिनेत्रं कृत्तिवाससम् ॥ १२
अन्तस्थं चाण्डबाह्यस्थं बाह्याभ्यन्तरतः परं ।
सर्वशक्तिमयं शान्तं सर्वाकारं सनातनम् ॥ १३
ब्रह्मेन्द्रोपेन्द्रयोगीन्द्रैरीड्यमानपदाम्बुजं ।
सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखम् ॥ १४
सर्वमावृत्य तिष्ठन्तं ददर्श पदमैश्वरम् ।
दृष्ट्वा च तादृशं रूपं दिव्यं माहेश्वरं पदम् ॥ १५

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तथैव च समाविष्टः स रामो हृतमानसः ।

आत्मन्याधाय चात्मानमोंकारं समनुस्मरन् ॥ १६
नाम्नामष्टसहस्रेण तुष्टाव परमेश्वरीं ।
ओं सीतोमापरमाशक्तिरनन्ता निष्कळाऽमला ॥ १७
शान्ता महेश्वरी नित्या शाश्वती परमाक्षरा ।
अचिन्त्या केवलानन्ता शिवात्मापरमात्मिका ॥ १८
अनादिरव्यया शुद्धा देवात्मा सर्वगोचरा ।
एकानेकविभागस्था मायातीता सुनिर्मला ॥ १९
महामाहेश्वरी शक्ता महादेवी निरञ्जना ।
काष्ठासर्वांतरस्था चिच्छक्तिरतिलालसा ॥ २०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

जानकी मिथिलानन्दा राक्षसान्तविधायिनी ।
रावणान्तकरी रम्या रामवक्षःस्थलालया ॥ २१
उमासर्वात्मिकाविद्याज्योतीरूपाऽयुताक्षरी ।
शान्तिः प्रतिष्ठा सर्वेषां निवृत्तिरमृतप्रदा ॥ २२
व्योममूर्तिर्व्योममयी व्योमाधारा च्युतालता ।
अनादिनिधना योषा कारणात्मा कलाकुला ॥ २३
नन्दप्रथमजा नाभिरमृतस्यान्तसंश्रया ।
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA
प्राणेश्वरप्रिया माता महामहिषवाहना ॥ २४

प्राणेश्वरी प्राणरूपा प्रधानपुरुषेश्वरी ।
सर्वशक्तिः कलाकाष्ठा ज्योत्स्नेन्दोर्महिमास्पदा ॥ २५
सर्वकार्यनियंत्री च सर्वभूतेश्वरेश्वरी ।
अनादिरव्यक्तगुणा महानन्दा सनातनी ॥ २६
आकाशयोनिर्योगस्था सर्वयोगेश्वरेश्वरी ।
शवासना चितान्तस्था महेशवृषवाहना ॥ २७
बालिका तरुणी वृद्धा वृद्धा माता जरातुरा ।
महामायासुदुष्पूरामूलप्रकृतिरीश्वरी ॥ २८
संसारयोनिः सकला सर्वशक्तिसमुद्भवा ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

संसारसारा दुर्वारा दुर्निरीक्ष्या दुरासदा ॥ २९
प्राणशक्तिः प्राणविद्या योगिनी परमाकला ।
महाविभूतिर्दुर्धर्षा मूलप्रकृतिसम्भवा ॥ ३०
अनाद्यनन्तविभवा परात्मा पुरुषोवली ।
सर्गस्थित्यन्तकरणी सुदुर्वाच्या दुरत्यया ॥ ३१
शब्दयोनिः शब्दमयीनादाख्यानादविग्रहा ।
प्रधानपुरुषातीता प्रधानपुरुषात्मिका ॥ ३२
पुराणी चिन्मयी पुंसामादिः पुरुषरूपिणी ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भूतान्तरात्मा कूटस्था महापुरुषसंज्ञिता ॥ ३३
जन्ममृत्युजरातीता सर्वशक्तिसमन्विता ।
व्यापिनी चानवच्छिन्ना प्रधाना सुप्रवेशिनी ॥ ३४
क्षेत्रज्ञा शक्तिरव्यक्तलक्षणा मलवर्जिता ।
अनादिमायासंभिन्ना त्रितत्वा प्रकृतिर्गुणः ॥ ३५
महामया समुत्पन्ना तामसी पौरुषी ध्रुवा ।
व्यक्ताऽव्यक्तात्मिका कृष्णरक्ता शुक्ला प्रसूतिका ॥ ३६
स्वकार्याकार्यजननी ब्रह्मास्या ब्रह्मसंश्रया ।
व्यक्ताप्रथमजा ब्राह्मी महती ज्ञानरूपिणी ॥ ३७

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वैराग्यैश्वर्यधर्मात्मा ब्रह्ममूर्तिर्हृदिस्थिता ।
जयदा जित्वरी जैत्री जयश्रीर्जयशालिनी ॥ ३८
सुखदा शुभदा सत्या शुभा संक्षोभकारिणी ।
अपां योनिः स्वयंभूतिर्मानसी तत्त्वसम्भवा ॥ ३९
ईश्वराणी च शर्वाणी शङ्करार्धशरीरिणी ।
भवानी चैव रुद्राणी महालक्ष्मीरथाम्बिका ॥ ४०
माहेश्वरी समुत्पन्ना भुक्तिमुक्तिफलप्रदा ।
सर्वेश्वरी सर्ववर्णा नित्या मुदितमानसा ॥ ४१

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ब्रह्मेन्द्रोपेन्द्रनमिता शङ्करेच्छानुवर्तिनी ।
ईश्वरार्धासनगता रघूत्तमपतिव्रता ॥ ४२

सकृद्विभाविता सर्वा समुद्रपरिशोषिणी ।
पार्वती हिमवत्पुत्री परमानन्ददायिनी ॥ ४३

गुणाढ्या योगदायोग्या ज्ञानमूर्तिर्विकासिनी ।
सावित्री कमला लक्ष्मीः श्रीरनन्तोरसि स्थिता ॥ ४४

सरोजनिलया शुभ्रा योगनिद्रा सुदर्शना ।
सरस्वती सर्वविद्या जगज्ज्येष्ठा सुमङ्गला ॥ ४५

वासवी वरदा वाच्या कीर्तिः सर्वार्थसाधिका ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वागीश्वरीसर्वविद्यामहाविद्यासुशोभना ॥ ४६
गुह्यविद्यात्मविद्याचसर्वविद्यात्मभाविता ।
स्वाहा विश्वम्भरी सिद्धिः स्वधा मेधा धृतिः श्रुतिः ॥ ४७
नाभिः सुनाभिः सुकृतिर्माधवी नरवाहिनी ।
पूज्या विभावरी सौम्या भगिनी भोगदायिनी ॥ ४८
शोभावंशकरी लीला मानिनी परमेष्ठिनी ।
त्रैलोक्यसुन्दरी रम्या सुन्दरी कामचारिणी ॥ ४९

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

महानुभावमध्यस्था महामहिषमर्दिनी ।

पद्ममाला पापहरा विचित्रमुकुटानना ॥ ५०

कान्ता चित्राम्बरधरा दिव्याभरणभूषिता ।
हंसाख्या व्योमनिलया जगत्सृष्टिविवर्धिनी ॥ ५१

निर्यन्त्रा मन्त्रवाहस्था नन्दिनी भद्रकालिका ।
आदित्यवर्णा कौमारी मयूरवरवाहिनी ॥ ५२

वृषासनगता गौरी महाकाली सुरार्चिता ।
अदितिर्नियता रौद्री पद्मगर्भा विवाहना ॥ ५३

विरूपाक्षी लेलिहाना महासुरविनाशिनी ।
महाफलाऽनवद्याङ्गी कामपूरा विभावरी ॥ ५४

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विचित्ररत्नमकुटा प्रणतार्धिविवर्धिनी ।
कौशिकी कर्षिणी रात्रिस्त्रिदशार्तिविनाशिनी ॥ ५५
विरूपा च सुरूपा च भीमा मोक्षप्रदायिनी ।
भक्तार्तिनाशिनी भव्या भवभावविनाशिनी ॥ ५६
निर्गुणा नित्यविभवा निस्सारा निरपत्रपा ।
यशस्विनी सामगतिर्भवाङ्गनिलयालया ॥ ५७
दीक्षा विद्यांधरी दीप्ता महेन्द्रविनिपातिनी ।
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA
सर्वातिशायिनी विद्या सर्वशक्तिप्रदायिनी ॥ ५८

सर्वेश्वरप्रिया वार्क्षी समुद्रान्तरवासिनी ।
अकलङ्का निराधारा नित्यसिद्धा निरामया ॥ ५९
कामधेनुर्वेदगर्भा धीमती मोहनाशिनी ।
निस्सङ्कल्पा निरातङ्का विनया विनयप्रदा ॥ ६०
ज्वालामालासहस्राढ्या देवदेवी मनोन्मनी ।
उर्वी गुर्वी गुरुः श्रेष्ठा सुगुणा षड्गुणात्मिका ॥ ६१
महाभगवती भव्या वसुदेवसमुद्भवा ।
महेन्द्रोपेन्द्रभगिनी भक्तिगम्यपरायणा ॥ ६२
ज्ञानज्ञेया जरातीता वेदान्तविषयागतिः ।
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दक्षिणा दहना बाह्या सर्वभूतनमस्कृता ॥ ६३
योगमाया विभावज्ञा महामोहा महीयसी ।
सत्या सर्वसमुद्भूतिर्ब्रह्मवृक्षाश्रयामतिः ॥ ६४
बीजाङ्कुरसमुद्भूतिर्महाशक्तिर्महामतिः ।
ख्यातिः प्रतिज्ञा चित्संविन्महायोगेन्द्रशायिनी ॥ ६५
विकृतिः शाङ्करी शास्त्री गन्धर्वयक्षसेविता ।
वैश्वानरी महाशाला देवसेना गुहप्रिया ॥ ६६
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA
महारात्री शिवानन्दा शची दुःस्वप्ननाशिनी ।

पूज्याऽपूज्या जगद्धात्री दुर्विज्ञेयस्वरूपिणी ॥ ६७
गुहाम्बिका गुहोत्पत्तिर्महापीठा मरुत्सुता ।
हव्यवाहान्तरा गार्गी हव्यवाहसमुद्भवा ॥ ६८
जगद्योनिर्जगन्माता जगन्मृत्युर्जरातिगा ।
बुद्धिर्माता बुद्धिमती पुरुषान्तरवासिनी ॥ ६९
तपस्विनी समाधिस्था त्रिनेत्रा दिवि संस्थिता ।
सर्वेन्द्रियमनोमाता सर्वभूतहृदि स्थिता ॥ ७०
संसारतारिणी विद्या ब्रह्मवादिमनोलया ।
ब्रह्माणी बृहती ब्राह्मी ब्रह्मभूता भयावनिः ॥ ७१

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

हिरण्मयी महारात्रिः संसारपरिवर्तिका ।
सुमालिनी सुरूपा च तारिणी भाविनी प्रभा ॥ ७२
उन्मीलनी सर्वसह्या सर्वप्रत्ययसाक्षिणी ।
तपिनी तापिनी विश्वा भोगदा धारिणी धरा ॥ ७३
सुसौम्या चन्द्रवदना ताण्डवासक्तमानसा ।
सत्त्वशुद्धिकरी शुद्धिर्मलत्रयविनाशिनी ॥ ७४
जगत्प्रिया जगन्मूर्तिस्त्रिमूर्तिरमृताश्रया ।
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA
विसभक्ष्या निराहारा निरङ्कुशरणोद्भवा ॥ ७५

चक्रहस्ता विचित्राङ्गी स्रग्विणी पद्मधारिणी ।
परापरविधानज्ञा महापुरुषपूर्वजा ॥ ७६
विद्येश्वरप्रियाऽविद्या विद्युज्जिह्वा जितश्रमा ।
विद्यामयी सहस्राक्षी सहस्रश्रवणात्मजा ॥ ७७
सहस्ररश्मिपद्मस्था महेश्वरपदाश्रया ।
ज्वालिनी सद्मना व्याप्ता तेजसी पद्मरोधिका ॥ ७८
महादेवाश्रया मान्या महादेवमनोरमा ।
व्योमलक्ष्मीः सिंहरथा चेकितान्यमितप्रभा ॥ ७९
विश्वेश्वरविमानस्था विशोका शोकनाशिनी ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अनाहता कुण्डलिनी नलिनी पद्मवासिनी ॥ ८०
शतानन्दा सतां कीर्तिः सर्वभूताशयस्थिता ।
वाग्देवता ब्रह्मकला कलातीता कलावती ॥ ८१
ब्रह्मर्षिर्ब्रह्महृदया ब्रह्मविष्णुशिवप्रिया ।
व्योमशक्तिः क्रियाशक्तिः जनशक्तिः परागतिः ॥ ८२
क्षोभिकारौद्रिकाभेद्या भेदाभेदविवर्जिता ।
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA
अभिन्नाभिन्नसंस्थाना वशिनी वंशहारिणी ॥ ८३
गुह्यशक्तिर्गुणातीता सर्वदा सर्वतोमुखी ।

भगिनी भगवत्पत्नी सकला कालकारिणी ॥ ८४
सर्ववित्सर्वतोभद्रा गुह्यातीता गुहावलिः ।
प्रक्रिया योगमाता च गन्धा विश्वेश्वरेश्वरी ॥ ८५
कपिला कपिलाकान्ता कनकाभा कलान्तरा ।
पुण्या पुष्करिणी भोक्त्री पुरन्दरपुरःसरा ॥ ८६
पोषणी परमैश्वर्यभूतिदा भूतिभूषणा ।
पञ्चब्रह्मसमुत्पत्तिः परमात्मात्मविग्रहा ॥ ८७
नर्मोदया भानुमती योगिज्ञेया मनोजवा ।
बीजरूपा रजोरूपा वशिनी योगरूपिणी ॥ ८८

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सुमन्त्रा मन्त्रिणी पूर्णा ह्लादिनी क्लेशनाशिनी ।
मनोहरमनोरक्षी तापसी वेदरूपिणी ॥ ८९
वेदशक्तिर्वेदमाता वेदविद्याप्रकाशिनी ।
योगेश्वरेश्वरी माला महाशक्तिर्मनोमयी ॥ ९०
विश्वावस्थावीरमुक्तिर्विद्युन्मालाविहायसी ।
पीवरी सुरभी वन्द्या नन्दिनी नन्दवल्लभा ॥ ९१
भारती परमानन्दा परापरविभेदिका ।
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA
सर्वप्रहरणोपेता काम्या कामेश्वरेश्वरी ॥ ९२

अचिन्त्याऽचिन्त्यमहिमा दुर्लेखा कनकप्रभा ।
कूष्मांडधनरत्नाढ्या सुगन्धा गन्धदायिनी । १३
त्रिविक्रमपदोद्भूता धनुष्पाणिः शिरोहया ।
सुदुर्लभा धनाध्यक्षा धन्या पिङ्गललोचना ॥ १४
शान्तिः प्रभावती दीप्तिः पङ्कजायतलोचना ।
आद्या हृत्कमलोद्भूता परा माता रणप्रिया ॥ १५
सत्क्रिया गिरिजा नित्यशुद्धा पुष्पनिरन्तरा ।
दुर्गा कात्यायनी चण्डी चर्चिका शान्तविग्रहा ॥ १६
हिरण्यवर्णा रजनी जगन्मन्त्रप्रवर्तिका ।
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मन्दराद्रिनिवासा च शारदा स्वर्णमालिनी ॥ ९७
रत्नमाला रत्नगर्भा पृथ्वी विश्वप्रमाथिनी ।
पद्मासना पद्मनिभा नित्यतुष्टाऽमृतोद्भवा ॥ ९८
धुन्वती दुष्प्रकम्पा च सूर्यमाता दृषद्वती ।
महेन्द्रभगिनी माया वरेण्या वरदर्पिता ॥ ९९
कल्याणी कमला रामा पञ्चभूतवरप्रदा ।
वाच्या परेश्वरी नन्द्या दुर्जया दुरतिक्रमा ॥ १००
कालरात्रिर्महावेगा वीरभद्रहितप्रिया ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भद्रकाली जगन्माता भक्तानां भद्रदायिनी ॥ १०१

कराळा पिङ्गळाकारा सामवेदा महानदा ।
तपस्विनी यशोदा च यथाध्वपरिवर्तिनी ॥ १०२

शङ्खिनी पद्मिनी सांख्या सांख्ययोगप्रवर्तिका ।
चैत्री संवत्सरा रुद्रा जगत्सम्पूरणीन्द्रजा ॥ १०३

शुम्भारिः खेचरी खस्था कम्बुग्रीवा कलिप्रिया ।
खरध्वजा खरारूढा परार्ध्या परमालिनी ॥ १०४

ऐश्वर्यरत्ननिलया विरक्ता गरुडासना ।
जयन्ती हृद्गुहा रम्या सत्ववेगा गणाग्रणीः ॥ १०५

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सङ्कल्पसिद्धा साम्यस्था सर्वविज्ञानदायिनी ।
कलिकल्मषहंत्री च गुह्योपनिषदुत्तमा ॥ १०६
नित्यदृष्टिः स्मृतिर्व्याप्तिः पुष्टिस्तुष्टिः क्रियावती ।
विश्वामरेश्वरेशाना भुक्तिर्मुक्तिः शिवाऽमृता ॥ १०७
लोहिता सर्वमाता च भीषणा वनमालिनी ।
अनन्तशयनाऽनाद्या नरनारायणोद्भवा ॥ १०८
नृसिंही दैत्यमथनी शङ्खचक्रगदाधरा ।
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA
संकर्षणसमुत्पत्तिरम्बिकोपान्तसंश्रया ॥ १०९

महाज्वाला महामूर्तिः सुमूर्तिः सर्वकामधुक् ।
सुप्रभा सुतरां गौरी धर्मकामार्थमोक्षदा ॥ ११०
भ्रूमध्यनिलयाऽपूर्वा प्रधानपुरुषा बली ।
महाविभूतिदा मध्या सरोजनयनासना ॥ १११
अष्टादशभुजा नाट्या नीलोत्पलदळप्रभा ।
सर्वशक्त्या समारूढा धर्माधर्मानुवर्जिता ॥ ११२
वैराग्यज्ञाननिरता निरालोका निरिन्द्रिया ।
विचित्रगहना धीरा शाश्वतस्थानवासिनी ॥ ११३
स्थानेश्वरी निरानन्दा त्रिशूलवरधारिणी ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अशेषदेवतामूर्तिर्देवता परदेवता ॥ ११४
गणात्मिका गिरेः पुत्री निशुम्भविनिपातिनी ।
अवर्णा वर्णरहिता निर्वर्णा बीजसम्भवा ॥ ११५
अनन्तवर्णाऽनन्यस्था शंकरी शान्तमानसा ।
अगोत्रा गोमती गोप्त्री गुह्यरूपा गुणान्तरा ॥ ११६
गोश्रीर्गव्यप्रिया गौरी गणेश्वरनमस्कृता ।
सत्यमात्रा सत्यसन्धा त्रिसन्ध्या सन्धिवर्जिता ॥ ११७
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA
सर्ववादाश्रया सांख्या सांख्ययोगसमुद्भवा ।

असंख्येयाऽप्रमेयाख्या शून्या शुद्धकुलोद्भवा ॥ ११८

बिन्दुनादसमुत्पत्तिः शम्भुवामा शशिप्रभा ।

विसङ्गा भेदरहिता मनोज्ञा मधुसूदनी ॥ ११९

महाश्रीः श्रीसमुत्पत्तिस्तमः पारे प्रतिष्ठिता ।

त्रितत्त्वमाता त्रिविधा सुसूक्ष्मपदसंश्रया ॥ १२०

शान्त्यतीता मलातीता निर्विकारा निराश्रया ।

शिवाख्या चित्रनिलया शिवज्ञानस्वरूपिणी ॥ १२१

दैत्यदानवनिर्मात्री काश्यपी कालकर्णिका ।

शास्त्रयोनिः क्रियामूर्तिश्चतुर्वर्गप्रदर्शिता ॥ १२२

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नारायणी नवोद्भूता कौमुदी लिङ्गधारिणी ।
कामुकी ललिता तारा परापरविभूतिदा ॥ १२३
परान्तजातमहिमा बडवा वामलोचना ।
सुभद्रा देवकी सीता वेदवेदांगपारगा ॥ १२४
मनस्विनी मन्युमाता महामन्युसमुद्भवा ।
अमृत्युरमृतास्वादा पुरुहूता पुरुप्लुता ॥ १२५
अशोच्या भिन्नविषया हिरण्यरजतप्रिया ।
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA
हिरण्या राजिता हैमी हेमाभरणभूषिता ॥ १२६

विभ्राजमाना दुर्ज्ञेया ज्योतिष्टोमफलप्रदा ।
महानिद्रासमुद्भूता बलीन्द्रा सत्यदेवता ॥ १२७
दीर्घा ककुद्मिनी विद्या शान्तिदा शान्तिवर्धिनी ।
लक्ष्म्यादिशक्तिजननी शक्तिचक्रप्रवर्तिका ॥ १२८
त्रिशक्तिजननीजन्या षडूर्मिपरिवर्जिता ।
स्वाहा च कर्मकरणा युगान्तदळनात्मिका ॥ १२९
सङ्कर्षणा जगद्धात्री कामयोनिः किरीटिनी ।
ऐन्द्री त्रैलोक्यनमिता वैष्णवी परमेश्वरी ॥ १३०
प्रद्युम्नदयिता दान्ता युग्मदृष्टिस्त्रिलोचना ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

महोत्कटा हंसगतिःप्रचण्डा चण्डविक्रमा ॥ १३१
वृषावेशा वियन्मात्रा विन्ध्यपर्वतवासिनी ।
हिमवन्मेरुनिलया कैलासगिरिवासिनी ॥ १३२
चाणूरहन्त्री तनया नीतिज्ञा कामरूपिणी ।
वेदविद्याव्रतरता धर्मशीलाऽनिलासना ॥ १३३
अयोध्यानिलया वीरा महाकालसमुद्भवा ।
विद्याधरक्रिया सिद्धा विद्याधरनिराकृतिः ॥ १३४
आप्यायन्ती वहन्ती च पावनी पोषणी खिला ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मातृका मन्मथोद्भूता वारिजावाहनप्रिया ॥ १३५

करीषिणी स्वधावाणी वीणावादनतत्परा ।
सेविता सेविका सेवा सिनीवाली गरुत्मती ॥ १३६

अरुन्धती हिरण्याक्षी मणिदा श्रीवसुप्रदा ।
वसुमती वसोर्धारा वसुन्धरासमुद्भवा ॥ १३७

वरारोहा वरार्हा च वपुःपङ्कसमुद्भवा ।
श्रीफली श्रीमती श्रीशा श्रीनिवासा हरिप्रिया ॥ १३८

श्रीधरा श्रीकरा कम्प्रा श्रीधरा ईशवीरणा ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अनन्तदृष्टिरक्षुद्रा धात्रीशा धनदप्रिया ॥ १३९

निहन्त्री दैत्यसिंहानां सिंहिका सिंहवाहिनी ।
सुसेना चन्द्रनिलया सुकीर्तिश्छिन्नसंशया ॥ १४०
बलज्ञा बलदा वामा लेलिहानाऽमृताश्रवा ।
नित्योदिता स्वयंज्योतिरुत्सुकाऽमृतजीविनी ॥ १४१
वज्रदंष्ट्रा वज्रजिह्वा वैदेही वज्रविग्रहा ।
मङ्गल्या मङ्गला माला मलिना मलहारिणी ॥ १४२
गान्धर्वी गारुडी चान्द्री कम्बलाश्वतरप्रिया ।
सौदामिनी जनानन्दा भ्रुकुटी कुटिलानना ॥ १४३

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कर्णिकारकरा कक्षा कंसप्राणापहारिणी ।
युगन्धरा युगावर्ता त्रिसन्ध्या हर्षवर्धिनी ॥ १४४
प्रत्यक्षदेवता दिव्या दिव्यगन्धा दिवापरा ।
शक्रासनगता शाक्री साध्वी नारी शवासना ॥ १४५
इष्टा विशिष्टा शिष्टेष्टा शिष्टाशिष्टप्रपूजिता ।
शतरूपा शतावर्ता विनीता सुरभिः सुरा ॥ १४६
सुरेन्द्रमाता सुद्युम्ना सुषुम्ना सूर्यसंस्थिता ।
समीक्ष्या सत्प्रतिष्ठा च निवृत्तिर्ज्ञानपारगा ॥ १४७
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA
धर्मशास्त्रार्थकुशला धर्मज्ञा धर्मवाहना ।

धर्माधर्मविनिर्मोक्त्री धार्मिकाणां शिवप्रदा ॥ १४८
धर्मशक्तिर्धर्ममयी विधर्मा विश्वधर्मिणी ।
धर्मान्तरा धर्ममध्या धर्मपूर्वधनप्रिया ॥ १४९
धर्मोपदेशा धर्मात्मा धर्मलभ्या धराधरा ।
कपाली शाकलामूर्तिः कलाकलितविग्रहा ॥ १५०
सर्वशक्तिविनिर्मुक्ता सर्वशक्त्याश्रया श्रया ।
सर्वा सर्वेश्वरी सूक्ष्मा सुसूक्ष्मा ज्ञानरूपिणी ॥ १५१
प्रधानपुरुषेशाना महापुरुषसाक्षिणी ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सदाशिवा वियन्मूर्तिर्देवमूर्तिरमूर्तिका ॥ १५२
एवं नाम्नां सहस्रेण तुष्टाव रघुनन्दनः ।
कृताञ्जलिपुटो भूत्वा सीतां हृष्टतनूरुहाम् ॥ १५३
भारद्वाजमहाभाग यश्चैतत्स्तोत्रमद्भुतं ।
पठेद्वा पाठयेद्वापि स याति परमं पदम् ॥ १५४
ब्रह्मक्षत्रियविड्योनिर्ब्रह्म प्राप्नोति शाश्वतम् ।
शूद्रः सद्गतिमाप्नोति धनधान्यविभूतयः ॥ १५५
भवन्ति स्तोत्रमाहात्म्यादेतत्स्वस्त्ययनं महत् ।
मारीभये राजभये तथा चोराग्निजे भये ॥ १५६

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

व्याधीनां प्रभवे घोरे शत्रूत्थाने च सङ्कटे ।
अनावृष्टिभये विप्र सर्वशान्तिकरं परं ॥ १५७

यद्यदिष्टतमं यस्य तत्सर्वं स्तोत्रतो भवेत् ।
यत्रैतत्पठ्यते सम्यक्सीतानामसहस्रकम् ॥ १५८

रामेण सहिता देवी तत्र तिष्ठत्यसंशयं ।
महापापाऽतिपापानि विलयं यान्ति सुव्रत ॥ १५९

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अद्भुतोत्तरकाण्डे सीतासहस्रनामस्तोत्रकथनं नाम पञ्चविंशतितमस्सर्गः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ श्रीरस्तु ॥

॥ श्रीसीतासहस्रनामावळिः ॥



ओं सीतायै नमः
उमायै
परमायै
शक्त्यै
अनन्तायै
निष्कलायै

ओं अमलायै नमः
शान्तायै
माहेश्वर्यै
नित्यायै १०
शाश्वत्यै
परमाक्षरायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं अचिन्त्यायै नमः
केवलायै
अनन्तायै
शिवात्मिकाय
परमात्मिकायै
अनादये
अव्ययायै
शुद्धायै २०

ओं देवतात्मने नमः
सर्वगोचरायै
एकानेकविभागस्थायै
मायातीतायै
सुनिर्मलायै
महामाहेश्वर्यै
शक्तायै
महादेव्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निरञ्जनायै
कान्तायै ३०
सर्वान्तरस्थायै
चिच्छक्त्यै
अतिलालसायै
जानक्यै
मिथिलानन्दायै
राक्षसान्तविधायिन्यै
रावणांतकर्यै

रम्यायै
रामवक्षःस्थलालयायै
उमायै ४०
सर्वात्मिकायै
विद्यायै
ज्योतीरूपायै
अयुताक्ष्यै
शांत्यै
सर्वेषां प्रतिष्ठायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं निवृत्त्यै नमः
अमृतप्रदायै
व्योममूर्त्यै
व्योममय्यै ५०
व्योमाधारायै
अच्युतायै
लतायै
अनादिनिधनायै

ओं योषायै नमः
कारणात्मने
कलाकुलायै
नन्दप्रथमजायै
अमृतस्यान्तसंश्रयायै
प्राणेश्वरप्रियायै ६०
मातामह्यै
महिषवाहनायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्राणेश्वर्यै
प्राणरूपायै
प्रधानपुरुषेश्वर्यै
सर्वशक्त्यै
कलायै
काष्ठायै
ज्योत्स्नायै
इन्दवे ७०
महिमास्पदायै

सर्वकार्यनियन्त्र्यै
सर्वभूतेश्वर्यै
अनादये
अव्यक्तगुणायै
महानन्दायै
सनातन्यै
आकाशयोन्यै
योगस्थायै
सर्वयोगेश्वरेश्वर्यै ८०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं शवासनायै नमः
चितान्तस्थायै
महेश्यै
वृषवाहनायै
बालिकायै
तरुण्यै
वृद्धायै
वृद्धमात्रे

ओं जरातुरायै नमः
महामायायै १०
सुदुष्पूरायै
मूलप्रकृत्यै
ईश्वर्यै
संसारयोन्यै
सकलायै
सर्वशक्तिसमुद्भवायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

संसारसारायै

दुर्वारायै

दुर्निरीक्षायै

दुरासदायै १००

प्राणशक्त्यै

प्राणविद्यायै

योगिन्यै

परमाकलायै

महाविभूत्यै

दुर्धर्षायै

मूलप्रकृतिसम्भवायै

अनाद्यनन्तविभवायै

परात्मने

पुरुषायै ११०

सर्गस्थित्यन्तकरण्यै बल्यै

दुर्वाच्यायै

दुरत्ययायै

शब्दयोनये

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं शब्दमय्यै नमः
नादाख्यायै
नादविग्रहायै
प्रधानपुरुषातीतायै
प्रधानपुरुषात्मिकायै
पुराण्यै १२०
चिन्मय्यै
पुंसामादये

ओं पुरुषरूपिण्यै नमः
भूतान्तरात्मने
कूटस्थायै
महापुरुषसंज्ञितायै
जन्ममृत्युजरातीतायै
सर्वशक्तिसमन्वितायै
व्यापिन्यै
अनवच्छिन्नायै १३०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रधानायै
सुप्रवेशिन्यै
क्षेत्रज्ञायै
शक्त्यै
अव्यक्तलक्षणायै
मलवर्जितायै
अनादिमायासम्भिन्नायै
त्रितत्वायै नमः
प्रकृत्यै

गुणायै
महामायायै
समुत्पन्नायै
तामस्यै
पौरुष्यै
ध्रुवायै
व्यक्तायै
अव्यक्तात्मिकायै
कृष्णरक्तायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं शुक्लायै नमः
प्रसूतिकायै १५०
स्वकार्यायै
कार्यजनन्यै
ब्रह्मास्यायै
ब्रह्मसंश्रयायै
व्यक्तायै
प्रथमजायै

ओं ब्राह्म्यै नमः
महत्यै
ज्ञानरूपिण्यै
वैराग्यैश्वर्यधर्मात्मने १६०
ब्रह्ममूर्तये
हृदिस्थितायै
जयदायै जित्वर्यै
जैत्र्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

जयश्रियै

जयशालिन्यै

सुखदायै

शुभदायै

शुभायै

संक्षोभकारिण्यै १७०

अपांयोन्यै

स्वयंभूत्यै

मानस्यै

तत्वसम्भवायै

ईश्वराण्यै

शर्वाण्यै

शंकरार्धशरीरिण्यै

भवान्यै

रुद्राण्यै

महालक्ष्म्यै १८०

अम्बिकायै

माहेश्वर्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं समुत्पन्नायै नमः
भुक्तिमुक्तिफलप्रदायै
सर्वेश्वर्यै
सर्ववर्गायै
नित्यायै
मुदितमानसायै
ब्रह्मेन्द्रोपेन्द्रनमितायै
शङ्करेच्छानुवर्तिन्यै १९०

ओं ईश्वरार्धांसंनगतायै नमः
रघूत्तमपतिव्रतायै
सकृद्विभावितायै
सर्वायै
समुद्रपरिशोषिण्यै
पार्वत्यै
हिमवत्पुत्र्यै
परमानन्ददायिन्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गुणाढ्यायै
योगदायै २००
योग्यायै
ज्ञानमूर्तिविकासिन्यै
सावित्र्यैः
कमलायै
लक्ष्म्यै
श्रियै
अनन्तोरसिस्थितायै

सरोजनिलयायै
शुभ्रायै
योगनिद्रायै २१०
सुदर्शनायै
सरस्वत्यै
सर्वविद्यायै
जगज्ज्येष्ठायै
सुमङ्गलायै
वासव्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं वरदायै नमः
वाच्यायै
कीर्त्यै
सर्वार्थसाधिकायै २२०
वागीश्वर्यै
सर्वविद्यायै
महाविद्यायै
सुशोभनायै

ओं गुह्यविद्यायै नमः
आत्मविद्यायै
सर्वविद्यायै
आत्मभावितायै
स्वाहायै
विश्वम्भर्यै २३०
सिद्ध्यै
स्वधायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मेधायै
धृत्यै
श्रुत्यै
नाभ्यै
सुनाभ्यै
सुकृतिन्यै
माधव्यै
नरवाहिन्यै २४०
पूज्यायै

विभावर्यै
सौम्यायै
भगिन्यै
भोगदायिन्यै
शोभायै
वंशकर्यै
लीलायै
मानिन्यै
परमेष्ठिन्यै २५०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं त्रैलोक्यसुन्दर्यै नमः
रम्यायै
सुन्दर्यै
कामचारिण्यै
महानुभावमध्यस्थायै
महामहिषमर्दिन्यै
पद्ममालायै
पापहरायै

ओं विचित्रमुकुटासनायै नमः
कान्तायै २६०
चित्राम्बरधरायै
दिव्याभरणभूषितायै
हंसाख्यायै
व्योमनिलयायै
जगत्सृष्टिविवर्धिन्यै
निर्यंत्रायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मन्त्रवाहस्थायै
नन्दिन्यै
भद्रकालिकायै
आदित्यवर्णायै २७०
कौमार्यै
मयूरवरवाहिन्यै
वृषासनगतायै
गौर्यै
महाकाल्यै

सुरार्चितायै
अदित्यै
नियतायै
रौद्र्यै
पद्मगर्भायै २८०
विवाहनायै
विरूपाक्षायै
लेलिहानायै
महासुरविनाशिन्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं महाफलायै नमः
अनवद्याङ्ग्यै
कामपूरायै
विभावर्यै
विचित्ररत्नमुकुटायै
प्रणतर्धिविवर्धिन्यै २९०
कौशिक्यै
कर्षिण्यै

ओं रात्र्यै नमः
त्रिदशार्तिविनाशिन्यै
विरूपायै
सुरूपायै
भीमायै
मोक्षप्रदायिन्यै
भक्तार्तिनाशिन्यै
भव्यायै ३००

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भवभावविनाशिन्यै
निर्गुणायै
नित्यविभवायै
निःसारायै
निरपत्रपायै
यशस्विन्यै
सामगीत्यै
भवांगनिलयायै
लयायै

दीक्षायै ३१०
विद्याधर्यै
दीप्तायै
महेन्द्रविनिपातिन्यै
सर्वातिशायिन्यै
विद्यायै
सर्वशक्तिप्रदायिन्यै
सर्वेश्वरप्रियायै
तार्क्ष्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं समुद्रान्तरवासिन्यै नमः
अकळङ्कायै ३२०
निराधारायै
नित्यसिद्धायै
निरामयायै
कामधेनवे
वेदगर्भायै
धीमत्यै

ओं मोहनाशिन्यै नमः
निस्संकल्पायै
निरातङ्कायै
विनयप्रदायै ३३०
विनयायै
ज्वालमालासहस्राढ्यायै
देवदेव्यै
मनोन्मन्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

उर्व्यै
गुर्व्यै
गुरवे
श्रेष्ठायै
षड्गुणात्मिकायै
महाभगवत्यै ३४०
भव्यायै
वसुदेवसमुद्भवायै
महेन्द्रोपेन्द्रभगिन्यै

भक्तिगम्यपरायणायै
ज्ञेयायै
जरातीतायै
ज्ञानाय
वेदान्तविषयायै
गत्यै
दक्षिणायै ३५०
दहनायै
बाह्यायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं सर्वभूतनमस्कृतायै नमः
योगमायायै
विभावज्ञायै
महामोहायै
महीयस्यै
सत्वायै
सर्वसमुद्भूत्यै
ब्रह्मवृक्षाश्रयायै ३६०

ओं मत्यै नमः
बीजाङ्कुरायै
समुद्भूत्यै
महाशक्त्यै
महामत्यै
ख्यात्यै
प्रतिज्ञायै
चित्संवेतायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

महायोगेन्द्रशायिन्यै
विकृत्यै ३७०
शाङ्कर्यै
शास्त्र्यै
गन्धर्वयक्षसेवितायै
वैश्वानर्यै
महाशालायै
देवसेनायै
गुहप्रियायै

महारात्र्यै
शिवानन्दायै
शच्यै ३८०
दुःस्वप्ननाशिन्यै
पूज्यायै
अपूज्यायै
जगद्धात्र्यै
दुर्विज्ञेयस्वरूपिण्यै
गुहाम्बिकायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं गुहोत्पत्त्यै नमः
महापीठायै
मरुत्सुतायै
हव्यवाहान्तरायै ३९०
गार्ग्यै
हव्यवाहसमुद्भवायै
जगद्योन्यै
जगन्मात्रे

ओं जगन्मृत्युजरातिगायै नमः
बुद्ध्यै
मात्रे
बुद्धिमत्यै
पुरुषान्तरवासिन्यै
तपस्विन्यै ४००
समाधिस्थायै
त्रिनेत्रायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दिविसंस्थितायै
सर्वेन्द्रियमनोमात्रे
सर्वभूतहृदिस्थितायै
संसारतारिण्यै
विद्यायै
ब्रह्मवादिन्यै
मनोलयायै
ब्रह्माण्यै ४१०
बृहत्यै

ब्राह्म्यै
ब्रह्मभूतायै
भयावन्यै
हिरण्मय्यै
महारात्र्यै
संसारपरिवर्तिकायै
सुमालिन्यै
सुरूपायै
तारिण्यै ४२०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं भाविन्यै नमः
प्रभायै
उन्मीलन्यै
सर्वसहायै
सर्वप्रत्ययसाक्षिण्यै
तपिन्यै
तापिन्यै
विश्वायै

ओं भोगदायै नमः
धारिण्यै ४३०
धरायै
सुसौम्यायै
चन्द्रवदनायै
ताण्डवासक्तमानसायै
नित्यशुद्धिकर्यै
शुद्ध्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मलत्रयविनाशिन्यै
जगत्प्रियायै
जगन्मूर्त्यै
त्रिमूर्त्यै ४४०
अमृताश्रयायै
निराश्रयायै
निराहारायै
निरङ्कुशायै
रणोद्भवायै

चक्रहस्तायै
विचित्राङ्ग्यै
स्रग्विण्यै
पद्मधारिण्यै
परायै ४५०
परविधानज्ञायै
महापुरुषपूर्वजायै
विद्येश्वरप्रियायै
अविद्यायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं विद्युज्जिह्वायै नमः
जितश्रमायै
विद्यामय्यै
सहस्राक्ष्यै
सहस्रश्रवणात्मजायै
सहस्ररश्मिपद्मस्थायै ४६०
महेश्वरपदाश्रयायै
ज्वालिन्यै

ओं सद्मनाव्याप्तायै नमः
तेजस्यै
पद्मरोधिकायै
महादेवाश्रयायै
मान्यायै
महादेवमनोरमायै
व्योमलक्ष्म्यै
सिंहरथायै ४७०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चेकितान्यै
अमितप्रभायै
विश्वेश्वर्यै
विमानस्थायै
विशोकायै
शोकनाशिन्यै
अनाहतायै
कुण्डलिन्यै
नलिन्यै

पद्मवासिन्यै
शतानन्दायै
सतांकीर्त्यै
सर्वभूताशयस्थितायै
वाग्देवतायै
ब्रह्मकळायै
कळातीतायै
कळावत्यै
ब्रह्मर्षये

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं ब्रह्महृदयायै नमः
ब्रह्मविष्णुशिवप्रियायै ४९०
व्योमशक्त्यै
क्रियाशक्त्यै
जनशक्त्यै
परागत्यै
क्षोभिकायै
रौद्रिकायै

ओं भेद्यायै नमः
भेदाभेदविवर्जितायै
अभिन्नायै
भिन्नसंस्थानायै ५००
वंशिन्यै
वंशहारिण्यै
गुह्यशक्त्यै
गुणातीतायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सर्वदायै
सर्वतोमुख्यै
भगिन्यै
भगवत्पत्न्यै
सकलायै
कालकारिण्यै ५१०
सर्वविदे
सर्वतोभद्रायै
गुह्यातीतायै

गुहावल्यै
प्रक्रियायै
योगमात्रे
गन्धायै
विश्वेश्वरेश्वर्यै
कपिलायै
कपिलकान्तायै ५२०
कनकाभायै
कलान्तरायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं पुण्यायै नमः
पुष्करिण्यै
भोक्त्र्यै
पुरन्दरपुरस्सरायै
पोषण्यै
परमैश्वर्यभूतिदायै
भूतिभूषणायै
पञ्चब्रह्मसमुत्पन्नायै ५३०

ओं परमात्मने नमः
आत्मविग्रहायै
नर्मोदयायै
भानुमत्यै
योगिज्ञेयायै
मनोजवायै
बीजरूपायै
रजोत्मायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वशिन्यै
योगरूपिण्यै ५४०
सुमन्त्रायै
मन्त्रिण्यै
पूर्णायै
ह्लादिन्यै
क्लेशनाशिन्यै
मनोहर्यै
मनोरम्यै

तापस्यै
वेदरूपिण्यै
वेदशक्त्यै ५५०
वेदमात्रे
वेदविद्याप्रकाशिन्यै
योगेश्वरेश्वर्यै
मालायै
महाशक्त्यै
मनोमय्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ॐ विश्वावस्थायै नमः
वीरमुक्त्यै
विद्युन्मालायै
विहायस्यै ५६०
पीवर्यै
सुरभिवंद्यायै
नन्दिन्यै
सत्ववल्लभायै

ॐ भारत्यै नमः
परमानन्दायै
परापरविभेदिकायै
सर्वप्रहरणोपेतायै
काम्यायै
कामेश्वरेश्वर्यै ५७०
अचिन्त्यायै
अचिन्त्यमहिम्ने

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दुर्लेखायै
कनकप्रभायै
कूष्मांड्यै
धनरत्नाढ्यायै
सुगन्धायै
गन्धदायिन्यै
त्रिविक्रमपदोद्भूतायै
धनुष्पाणयै ५८०
शिरोहयायै

सुदुर्लभायै
धनाध्यक्षायै
धनायै
पिङ्गललोचनायै
भ्रांत्यै
प्रभावत्यै
दीप्त्यै
पङ्कजायतलोचनायै
आद्यायै ५९०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं हृत्कमलोद्भूतायै नमः
परायैमात्रे
रणप्रियायै
सत्क्रियायै
गिरिजायै
नित्यशुद्धायै
पुष्पनिरन्तरायै
दुर्गायै

ओं कात्यायन्यै नमः
चण्ड्यै ६००
चर्चिकायै
शान्तिविग्रहायै
हिरण्यवर्णायै
रजन्यै
जगन्मन्त्रप्रवर्तिकायै
मन्दराद्रिनिवासायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शारदायै
स्वर्णमालिन्यै
रत्नमालायै
रत्नगर्भायै ६१०
पृथिव्यै
विश्वप्रमाथिन्यै
पद्मासनायै
पद्मनिभायै
नित्यतुष्टायै

अमृतोद्भवायै
धुन्वत्यै
दुष्प्रकम्पायै
सूर्यमात्रे
दृषद्वत्यै ६२०
महेन्द्रभगिन्यै
मायायै
वरेण्यायै
वरदर्पितायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं कल्याण्यै नमः
कमलायै
रामायै
पञ्चभूतवरप्रदायै
वाच्यायै
वरेश्वर्यै ६३०
नन्द्यायै
दुर्जयायै

ओं दुरतिक्रमायै नमः
कालरात्र्यै
महावेगायै
वीरभद्रहितप्रियायै
भद्रकाल्यै
जगन्मात्रे
भक्तानांभद्रदायिन्यै
करालायै ६४०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पिङ्गलाकारायै
सामवेदायै
महानद्यै
तपस्विन्यै
यशोदायै
यथाध्वपरिवर्तिन्यै
शङ्खिन्यै
पद्मिन्यै
सांख्यायै

सांख्ययोगप्रवर्तिकायै ६५०
चैत्र्यै
संवत्सरायै
रुद्रायै
जगत्संपूरण्यै
इन्द्रजायै
शुम्भायै
खेचर्यै
खस्थायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं कम्बुग्रीवायै नमः
कलिप्रियायै ६६०
खरध्वजायै
खरारूढायै
परार्ध्यायै
परमालिन्यै
ऐश्वर्यरत्ननिलयायै
[illegible]

ओं गरुडासनायै नमः
जयंत्यै
हृद्गुहारम्यायै
सत्ववेगायै ६७०
गणाग्रण्यै
सङ्कल्पसिद्धायै
साम्यस्थायै
सर्वविज्ञानदायिन्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कलिकल्मषहंत्र्यै
गुह्योपनिषदायै
उत्तमायै
नित्यदृष्ट्यै
स्मृत्यै
व्याहृत्यै ६८०
पुष्ट्यै
तुष्ट्यै
क्रियावत्यै

विश्वायै
अमरेश्वरेशानायै
मुक्त्यै
भुक्त्यै
शिवायै
अमृतायै
लोहितायै ६९०
सर्वमात्रे
भीषणायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं वनमालिन्यै नमः
अनन्तशयनायै
अनादये
नरनारायणोद्भवायै
नृसिंह्यै
दैत्यमथन्यै
शङ्खचक्रगदाधरायै
संकर्षणसमुत्पत्यै ७००

ओं अम्बिकोपान्तसंश्रयायै नमः
महाज्वालायै
महामूर्त्यै
सुमूर्त्यै
सर्वकामदुघे
सुप्रभायै
सुतरांगौर्यै
धर्मकामार्थमोक्षदायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भ्रूमध्यनिलयायै
अपूर्वायै ७१०
प्रधानपुरुषायै
बल्यै
महाविभूतिदायै
मध्यायै
सरोजनयनासनायै
अष्टादशभुजायै
नाट्यायै

नीलोत्पलदळप्रभायै
सर्वशक्त्यासमारूढायै
धर्माधर्मानुवर्जितायै ७२०
वैराग्यज्ञाननिरतायै
निरालोकायै
निरिंद्रियायै
विचित्रगहनायै
धरायै
शाश्वतस्थानवासिन्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं स्थानेश्वर्यै नमः
निरान्दायै
त्रिशूलवरधारिण्यै
अशेषदेवतामूर्त्यै ७३०
देवतायै
परदेवतायै
गणात्मिकायै
गिरेः पुत्र्यै

ओं निशुम्भविनिपातिन्यै नमः
अवर्णायै
वर्णरहितायै
निर्वाराणायै
बीजसम्भवायै
अनन्तवर्णायै ७४०
अनन्यस्थायै
शंकर्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शांतमानसायै
अगोत्रायै
गोमत्यै
गोप्त्र्यै
गुह्यरूपायै
गुणान्तरायै
गोश्रियै
गव्यप्रियायै ७५०
गौर्यै
गणेश्वरनमस्कृतायै
सत्यमात्रायै
सत्यसन्धायै
त्रिसन्ध्यासन्धिवर्जितायै
सर्ववादाश्रयायै
सांख्यायै
सांख्ययोगसमुद्भवायै
असंख्यायै
अप्रमेयाख्यायै ७६०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं शून्यायै नमः
हुड्ढकुलोद्भवायै
बिन्दुनादसमुत्पत्त्यै
शम्भुवामायै
शशिप्रभायै
विसङ्गायै
भेदरहितायै
मनोज्ञायै

ओं मधुसूदन्यै नमः
महाश्रियै ७७०
श्रीसमुत्पत्त्यै
तमः पारेप्रतिष्ठितायै
त्रितत्त्वमात्रे
त्रिविधायै
सूक्ष्मपदसंश्रयायै
शांत्यतीतायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मलातीतायै
निर्विकारायै
निराश्रयायै
शिवाख्यायै ७८०
चित्रनिलयायै
शिवज्ञानस्वरूपिण्यै
दैत्यदानवनिर्मात्र्यै
काश्यप्यै
कालकर्णिकायै

शास्त्रयोन्यै
प्रियामूर्त्यै
चतुर्वर्गप्रदर्शितायै
नारायण्यै
नवोद्भूतायै ७९०
कौमुद्यै
लिङ्गधारिण्यै
कौमुद्यै
कलितायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं तारायै नमः
परापरविभूतिदायै
परान्तराजमहिम्ने
बडबायै
वामलोचनायै
सुभद्रायै ८००
देवक्यै
सीतायै
ओं वेदवेदांगपारगायै नमः
मनस्विन्यै
मन्युमात्रे
महामन्युसमुद्भवायै
अमृत्यवे
अमृतास्वादायै
पुरुहूतायै
पुरुप्लुतायै ८१०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अशोच्यायै
भिन्नविषयायै
हिरण्यरजतप्रियायै
हिरण्यराजित्यै
हैम्यै
हेमाभरणभूषितायै
विभ्राजमानायै
दुर्ज्ञेयायै
ज्योतिष्टोमफलप्रदायै

महानिद्रायै
समुद्भूत्यै
बलींद्रायै
सत्यदेवतायै
दीर्घायै
ककुद्मिन्यै
विद्यायै
शान्तिदायै
शान्तिवर्धिन्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं लक्ष्म्यादिशक्तिजनन्यै नमः

शक्तिचक्रप्रवर्तकायै ८३०

त्रिशक्तिजनन्यै

जन्यायै

षडूर्मिपरिवर्जितायै

स्वाहायै

कर्मकरण्यै

युगान्तदलनात्मिकायै

ओं सङ्कर्षणायै नमः

जगद्धात्र्यै

कामयोन्यै

किरीटिन्यै ८४०

ऐन्द्र्यै

त्रैलोक्यनमितायै

वैष्णव्यै

परमेश्वर्यै

CC-0. Prof.Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रद्युम्नदयितायै
दान्तायै
युग्मदृष्ट्यै
त्रिलोचनायै
महोत्कटायै
हंसगत्यै ८५०
प्रचण्डायै
चण्डविक्रमायै
वृषावेषायै

वियन्मात्रायै
विन्ध्यपर्वतवासिन्यै
हिमवन्मेरुनिलयायै
कैलासगिरिवासिन्यै
चाणूरहन्त्र्यै
तनयायै
नीतिज्ञायै ८६०
कामरूपिण्यै
योगविद्यान्तप्रियायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं धर्मशीलायै नमः
अनिलासनायै
अयोध्यानिलयायै
वीरायै
महाकालसमुद्भवायै
विद्याधरक्रियायै
सिद्धायै
विद्याधरनिराकृत्यै ८७०

ओं आप्याययन्त्यै नमः
वहन्त्यै
पावन्त्यै
पोषिण्यै
खिलायै
मातृकायै
मन्मथोद्भूतायै
वारिजायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वाहनप्रियायै
करीषिण्यै ८८०
स्वधायै
वाण्यै
वीणावादनतत्परायै
सेवितायै
सेविकायै
सेवायै
सिनीवाल्यै

गरुत्मत्यै
अरुन्धत्यै
हिरण्याक्ष्यै ८९०
मणिदायै
श्रियै
वसुप्रदायै
वसुमत्यै
वसोर्धारायै
वसुन्धरासमुद्भवायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं वरारोहायै नमः
वरार्हायै
वपुःसङ्गसमुद्भवायै
श्रीफल्यै १००
श्रीमत्यै
श्रीशायै
श्रीनिवासायै
हरिप्रियायै

ओं श्रीधर्यै नमः
श्रीकर्यै
कंभ्रायै
श्रीधरायै
ईशवीरण्यै
अनन्तदृष्ट्यै ११०
अक्षुद्रायै
धात्रीशायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

धनदप्रियायै
दैत्यसिंहानां निहन्त्र्यै
सिंहिकायै
सिंहवाहिन्यै
सुसेनायै
चन्द्रनिलयायै
सुकीर्त्यै
छिन्नसंशयायै १२०

बलज्ञायै
बलदायै
वामायै
लेलिहानायै
अमृताश्रवायै
नित्योदितायै
स्वयंज्योतिषे
उत्सुकायै
अमृतजीविन्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं वज्रदंष्ट्रायै नमः १३०
वज्रजिह्वायै
वैदेह्यै
वज्रविग्रहायै
मङ्गल्यायै
मङ्गलायै
मालायै
मलिनायै

ओं मलहारिण्यै नमः
गान्धर्व्यै
गारुड्यै १४०
चान्द्र्यै
कम्बलाश्वतरप्रियायै
सौदामिन्यै
जनानन्दायै
भ्रुकुटीकुटिलाननायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कर्णिकारकरायै
कक्षायै
कंसप्राणापहारिण्यै
युगन्धरायै
युगावर्तायै ९५०
त्रिसन्ध्यायै
हर्षवर्धिन्यै
प्रत्यक्षदेवतायै
दिव्यायै

दिव्यगन्धायै
दिवापरायै
शक्रासनगतायै
शाक्र्यै
साध्व्यै
नार्यै ९६०
शवासनायै
इष्टायै
विशिष्टायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं शिष्टेष्टायै नमः
शिष्टाशिष्टप्रपूजितायै
शतरूपायै
शतावर्तायै
विनीतायै
सुरभये
सुरायै ९७०
सुरेन्द्रमात्रे

ओं सुद्युम्नायै नमः
सुषुम्नायै
सूर्यसंस्थितायै
समीक्षापत्त्रप्रतिष्ठायै
निवृत्त्यै
ज्ञानपारगायै
धर्मशास्त्रार्थकुशलायै
धर्मज्ञायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

धर्मवाहनायै १८०
धर्माधर्मविनिर्मात्र्यै
धार्मिकाणां शिवप्रदायै
धर्मशक्त्यै
धर्ममय्यै
विधर्मायै
विश्वधर्मिण्यै
धर्मान्तरायै
धर्ममध्यायै

धर्मपूर्वायै
धनप्रियायै १९०
धर्मोपदेशायै
धर्मात्मने
धर्मलभ्यायै
धराधरायै
कपाल्यै
शाकलामूर्त्यै
कलाकलितविग्रहायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं सर्वशक्तिविनिर्मुक्तायै नमः
सर्वशक्त्याश्रयाश्रयायै
सर्वायै १०००
सर्वेश्वर्यै
सूक्ष्मायै
सुसूक्ष्मज्ञानरूपिण्यै

ओं प्रधानपुरुषेशानायै नमः
महापुरुषसाक्षिण्यै
सदाशिवायै
वियन्मूर्त्यै
देवमूर्त्यै
अमूर्तिकायै १००६

श्रीसीतासहस्रनामावलिस्सम्पूर्णा ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ श्रीरस्तु ॥

॥ श्रीसीताष्टोत्तरशतनामस्तोत्रम् ॥



ब्रह्मतो वचनं श्रुत्वा रामः कमललोचनः ।
प्रोन्मील्य शनकैरक्षि वेपमानो महाभुजः ॥ १
प्रणम्य शिरसा भूमौ तेजसा चापि विह्वलः ।
भीतः कृताञ्जलिपुटः प्रोवाच परमेश्वरीम् ॥ २
सर्वमावृत्य तिष्ठन्तं ददर्श पदमैश्वरम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दृष्ट्वा च तादृशं रूपं दिव्यं माहेश्वरं पदम् ॥ ३
तयैव च समाविष्टः स रामो हृतमानसः ।
आत्मन्याधाय चात्मानमोङ्कारं समनुस्मरन् ॥ ४
अष्टोत्तरशतेनाथ तुष्टाव परमेश्वरीम् ।
ओम्. शान्ता महेश्वरी नित्या शाश्वती परमाक्षरा ।
अचिन्त्या केवलाऽनन्ता शिवात्मा परमात्मिका ॥ १
जानकी मिथिलानन्दा राक्षसान्तविधायिनी ।
रावणान्तकरी रम्या रामवक्षस्थलालया ॥ २

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्राणेश्वरी प्राणरूपा प्रधानपुरुषेश्वरी ।
सर्वशक्तिः कला काष्ठा ज्योत्स्नेंदोर्महिमास्पदा ॥ ३
पुराणी चिन्मयी पुंसामादिः पुरुषरूपिणी ।
भूतान्तरात्मा कूटस्था महापुरुषसंज्ञिता ॥ ४
स्वकार्या कार्यजननी ब्रह्मास्या ब्रह्मसंश्रया ।
व्यक्ता प्रथमजा ब्राह्मी महती ज्ञानरूपिणी ॥ ५
महेश्वरी समुत्पन्ना भुक्तिमुक्तिफलप्रदा ।
सर्वेश्वरी सर्ववर्णा नित्या मुदितमानसा ॥ ६
वासवी वरदा वाच्या कीर्तिः सर्वार्थसाधिका ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वागीश्वरी सर्वविद्या महाविद्या सुशोभना ॥ ७
शोभा वंशकरी लीला मानिनी परमेष्ठिनी ।
त्रैलोक्यसुन्दरी रम्या सुन्दरी कामचारिणी ॥ ८
विरूपा च सुरूपा च भीमा मोक्षप्रदायिनी ।
भक्तार्तिनाशिनी भव्या भवभावविनाशिनी ॥ ९
विकृतिः शाङ्करी शास्त्री यक्षगन्धर्वसेविता ।
वैश्वानरी महाशाला देवसेना गुहप्रिया ॥ १०
हिरण्मयी महाराशिः संतापपरिवर्जिता ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सुमालिनी सुरूपा च तारिणी भाविनी प्रभा ॥ ११

जगत्प्रिया जगन्मूर्तिस्त्रिमूर्तिरमृताश्रया ।
निराश्रया निराहारा निरङ्कुशरणोद्भवा ॥ १२

श्रीफली श्रीमती श्रीशा श्रीनिवासा हरिप्रिया ।
श्रीधरा श्रीकरा कम्प्रा श्रीधरा ईशवीरणा ॥ १३

श्रीसीताष्टोत्तरंशतनामस्तोत्रं

॥ समाप्तम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ श्रीसीताष्टोत्तरशतनामावलिः ॥



ओं शान्तायै नमः
महेश्वर्यै
नित्यायै
शाश्वत्यै
परमाक्षरायै
ओं अचिन्त्यायै नमः
केवलायै
अनन्तायै
शिवात्मने
परमात्मिकायै १०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

जानक्यै
मिथिलानन्दायै
राक्षसान्तविधायिन्यै
रावणान्तकर्त्र्यै
रम्यायै
रामवक्षस्स्थलालयायै
प्राणेश्वर्यै
प्राणरूपायै
प्रधानपुरुषेश्वर्यै

सर्वशक्त्यै २०
कलायै
काष्ठायै
ज्योत्स्नायै
इन्दुमहिमास्पदायै
पुराण्यै
चिन्मय्यै
पुंसामाद्यै
पुरुषरूपिण्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं भूतान्तरात्मने नमः
कूटस्थायै ३०
महापुरुषसंज्ञितायै
स्वकार्यायै
कार्यजनन्यै
ब्रह्मास्यायै
ब्रह्मसंश्रयायै
व्यक्तायै

ओं प्रथमजायै नमः
ब्राह्म्यै
महत्त्यै
ज्ञानरूपिण्यै ४०
माहेश्वर्यै
समुत्पन्नायै
भुक्तिमुक्तिफलप्रदायै
सर्वेश्वर्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सर्ववर्णायै
नित्यायै
मुदितमानसायै
वासव्यै
वरदायै
वाच्यायै ५०
कर्त्र्यै
सर्वार्थसाधिकायै
वागीश्वर्यै
सर्वविद्यायै
महाविद्यायै
सुशोभनायै
शोभायै
वंशकर्त्र्यै
लीलायै
मानिन्यै ६०
परमेष्ठिन्यै
त्रैलोक्यसुन्दर्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं सुन्दर्यै नमः
कामचारिण्यै
विरूपायै
सुरूपायै
भीमायै
मोक्षप्रदायिन्यै
भक्तार्तिनाशिन्यै
भव्यायै ७०

ओं भवभावविनाशिन्यै नमः
विकृत्यै
शांकर्यै
शास्त्र्यै
गन्धर्वयक्षसेवितायै
वैश्वानर्यै
महाशालायै
देवसेनायै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गुहप्रियायै
हिरण्मय्यै ८०
महाराज्ञ्यै
संसारपरिवर्तिकायै
सुमालिन्यै
सुरूपायै
तारिण्यै
भाविन्यै
प्रभायै

जगत्प्रियायै
जगन्मूर्त्यै
त्रिमूर्त्यै ९०
अमृताश्रयायै
निराश्रयायै
निराहारायै
निरंकुशायै
रणोद्भवायै
श्रीफल्यै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ओं श्रीमत्यै नमः
श्रीशायै
श्रीनिवासायै
हरिप्रियायै १००
श्रीकरायै
कम्रायै

ओं श्रीधरायै नमः
ईशवीरणायै
श्रीवेदवत्यै
श्रीहनुमदाश्रितायै
सर्वसम्पद्दात्र्यै
श्रीपट्टाभिरामप्रियायै १०८

श्रीसीताष्टोत्तरशतनामावलिः समाप्ता ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA